
# संस्कृतनवरात्रमहोत्सवः
## 14.08.2019 to 22.08.2019






संस्कृतनवरात्रमहोत्सवसन्दर्भे विद्यापीठस्य परमपावनप्राङ्गणे स्वागतीक्रियन्ते मान्याः मन्त्रिणः श्रीरमेशपोखरियालमहोदयाः, मान्याः कुलाधिपतयः श्रीनीडामङ्गलं गोपालस्वामिवर्याः तथा अन्ये अतिथयः (वामभागचित्रे) । मान्यैः मन्त्रिभिः कुलाधिपतिभिश्च उत्सवस्य समुद्घाटनं क्रियते प्रदीपप्रज्वलनेन (दक्षिणचित्रे) ।


संस्कृतभाषां लोकभाषात्वेन समेधयितुं प्रतिवर्षमिव ऐषमोऽपि केन्द्रसर्वकारस्य निर्देशमनु तिरुपतिस्थे राष्ट्रियसंस्कृतविद्यापीठे संस्कृत-सप्ताहस्थानिकः संस्कृतनवरात्रमहोत्सवो महता वैभवेन पर्यपाल्यत । अगस्तमासस्य चतुर्दशात् दिनाङ्कात् द्वाविंशं दिनाङ्कं यावत् नव दिनानि कार्यक्रमोऽयं परिव्याप्तः । १४.०८.२०१९ दिनाङ्के महतोऽस्य कार्यक्रमस्य उद्घाटनसमारोहे भारतसर्वकारस्य मानवसंसाधनविकास-मन्त्रालयस्य केन्द्रमन्त्रिणः मान्याः **डॉ. रमेशपोखरियाल "निशङ्क"**महोदयाः मुख्यातिथिपदं व्यभूषयन् । राष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतयः, पद्मभूषणबिरुदाङ्किताः मान्याः **श्री नीडामङ्गलं गोपालस्वामिमहाभागाः** उद्घाटनसमारोहस्याध्यक्ष्यं निरवहन् । विद्यापीठस्य कुलपतयः आचार्याः




**वि.मुरलीधरशर्ममहोदयाः** समारोहेऽस्मिन् सर्वेक्षकत्वेन व्यराजन्त । मान्याः केन्द्रमन्त्रिणः संस्कृतनवरात्रमहोत्सवस्य उद्घाटनेन सह विद्यापीठे नूतनतया अनुवादविभागम्, अभिनयकलाविभागञ्च समुदघाटयन् । अपि च कक्ष्याप्रकोष्ठसमुदायस्य, वेङ्कटाचलच्छात्रावासस्य, जलशुद्धीकरण-योजनायाश्च शिलान्यासमकुर्वन् । अस्मिन् समारोहे मान्यैः मन्त्रिवर्यैः हिन्दीभाषायां विरचितस्य **"कोई मुश्किल नहीं"** इति नाम्नः ग्रन्थस्य संस्कृतानुवादः **"किमपि दुष्करं नहि"** इति लोकार्पणीभूतः । अयमनुवादः विद्यापीठस्य कुलसचिवैः **प्रो.जी.एस्.आर्.कृष्णमूर्त्तिमहाभागैः** कृतः । युगपदेव विद्यापीठस्य शोधपत्रिकायाः महस्विन्याः, वृत्तपत्रिकायाः शेमुष्याः, English Reader इति आंग्लग्रन्थस्य च लोकार्पणमभवत् । समारोहेऽस्मिन् संस्कृतभारत्याः अखिलभारतीयप्रकाशनप्रमुखाः **श्रीसत्यनारायणमहाभागाः** संस्कृतसेवाव्रतित्वेन सम्मानिताः । समारोहस्यास्य प्रधानसञ्चालकाः **डॉ.नारायणवर्याः** आसन् । **डॉ.यशस्विवर्यः, डॉ.सच्चिदानन्दमूर्त्तिवर्यश्च** सहसञ्चालकौ आस्ताम् ।

चतुर्दशदिनाङ्के सायाह्ने **"पद्यवाचनानुगुणं चित्रलेखनम्"** इति कार्यक्रमः प्रवृत्तः, यत्र सुप्रसिद्धाश्चित्रकाराः **श्रीसिङ्गंपल्लिसत्यनारायण-महोदयाः** संस्कृतपद्योक्तविषयभावयोरनुगुणं चित्रलेखनमकुर्वन् । विद्यापीठस्य शैक्षणिकसङ्कायप्रमुखाः **प्रो.राणीसदाशिवमूर्त्तिमहाभागाः** अत्र पद्यान्यपठन् ।




पञ्चददशे दिनाङ्के सायं संस्कृतकवितासङ्गोष्ठी प्रवृत्ता, यत्र विद्यापीठस्य अध्यापकाः, शोधच्छात्राश्च सोत्साहं भागमगृह्णन् । इह कुलसचिवाः **प्रो.जि.एस्.आर्.कृष्णमूर्त्तिमहोदयाः** आध्यक्ष्यं निरवहन् । **डॉ.सोमनाथदाशवर्याश्च** अत्र सञ्चालका आसन् ।

षोडशे दिनाङ्के तिरुपतिनगरस्य एकादशसु केन्द्रविद्यालयेषु राज्यविद्यालयेषु च विद्यापीठेन संस्कृतस्पर्धाः समायोजिताः, यत्र सप्तशताधिकाः (७००) विद्यालयच्छात्राः सोत्साहं भागमगृह्णन् । आसां संस्कृतस्पर्धानां सञ्चालकाः शैक्षिकसङ्कायप्रमुखाः **प्रो.रा.प्रह्लादजोशीमहाभागा** अभवन् ।

सप्तदशे दिनाङ्के श्रीमद्भगवद्गीतावधानं सञ्जातम्, यत्र शास्त्रिप्रथमवर्षच्छात्रः **आयुष्मान् उमामहेश्वरराव**ः कृत्स्नायाः भगवद्गीतायाः अवधानं कृत्वा विदुषामाशिषः प्राप्नोत् । एतस्यावधानकार्यक्रमस्याध्यक्ष्यं निरवहन् विद्यापीठस्य वरिष्ठाचार्याः **प्रो.एम्.एल्.नरसिंहमूर्त्तिमहोदयाः** । सञ्चालनञ्चाकुर्वन् **प्रो.सि.राघवन्वर्याः** ।

अष्टादशदिनाङ्के भजनसन्ध्या, भरतनाट्यञ्च प्रवृत्तम्, यत्र विद्यापीठच्छात्राः भरतनाट्यप्रस्तुत्या स्वीयां प्रतिभां, भजनकीर्त्तनेन स्वीयां भक्तिं च प्राकटयन् ।

उनविंशे दिनाङ्के विद्यापीठच्छात्राणां शैक्षिक-सांस्कृतिकस्पर्धाः प्रवर्तन्त, यत्र शताधिकाश्छात्राः भागमगृह्णन् । तत्र शैक्षिकस्पर्धानां सञ्चालकाः **डॉ.मुरलीधरराववर्याः**, **डॉ.राधागोविन्दत्रिपाठिमहाशयाः**, **डॉ.प्रदीपबागवर्याः**, **डॉ.नन्दनभट्टवर्याश्च** आसन् । **डॉ.लीनाचन्द्रा-डॉ.जे.बलिचक्रवर्तिवर्याश्च** सांस्कृतिकस्पर्धानां सञ्चालनमकुर्वन् ।

विंशे दिनाङ्के संस्कृतवस्तुप्रदर्शिनी आयोजिता, यत्र प्रायो द्विशतानां दैनन्दिनजीवनोपयोगिवस्तूनां संस्कृतनामानि तत्तद्वस्तुना सह प्रदर्शितानि । अत्र च तत्तद्वस्तुनो नामस्मरणस्पर्धाऽपि प्रवृत्ता ।

एकविंशे दिनाङ्के संस्कृतशास्त्राणामैतिह्यमिति विषयमधिकृत्य अखिलभारतीया शोधसङ्गोष्ठी सम्पन्ना, यत्र अध्यापकाः शोधच्छात्राश्च शताधिका भागमगृह्णन् । **प्रो.सिहेच्.पि.सत्यनारायणवर्याः**, **प्रो.राधाकान्तठाकुरवर्याः**, **प्रो.के.गणपतिभट्टवर्याश्च** सत्राणामाध्यक्ष्यं निरवहन् । **प्रो.सत्यनारायण आचार्यमहोदयाः**, **प्रो.के.सूर्यनारायणमहाशयाः**, **डॉ.सोमनाथवर्याश्च** सत्राणां सञ्चालनमकुर्वन् ।

द्वाविंशे दिनाङ्के पूर्वाह्णे रसप्रश्नस्पर्धा सञ्जाता । एतस्या अध्यक्षाः **प्रो.उन्नीकृष्णन्नम्पियातिरिवर्याः**, सञ्चालकाश्च **प्रो.सि.रङ्गनाथन्महोदयाः** आसन् ।

द्वाविंशे दिनाङ्के अपराह्णे महतः संस्कृतनवरात्रस्य स्वस्तिवाचनिकमहोत्सवः (समापनोत्सवः) समपद्यत । यत्र भाग्यनगरस्य (हैदराबाद्) संस्कृतअकादम्येः निदेशकाः आचार्याः **नीलकण्ठमहाभागाः** मुख्यातिथित्वेन संस्थिताः । विद्यापीठस्य कुलपतयः आचार्याः **वि.मुरलीधरशर्ममहोदयाश्च** अध्यक्षत्वेन विराजिताः । अत्र संस्कृतनवरात्रोत्सवस्य नानास्पर्धासु प्राप्तपुरस्कारेभ्यः छात्रेभ्यः पुरस्काराः प्रादीयन्त । पुरस्कारप्राप्तृषु चतुष्षष्ट्यधिकशतसङ्ख्याकाः विद्यालयच्छात्राः द्विसप्ततिसंख्याकाश्च विद्यापीठच्छात्राः अवर्तन्त ।

विद्यापीठस्य कुलपतिवर्याणां सर्वेक्षकत्वे प्रवृत्तस्यास्य नवदिनात्मककार्यक्रमस्य संयोजकाः **डॉ.नारायणवर्याः**, सहसंयोजकाश्च **डॉ.यशस्विवर्याः**, **डॉ.सच्चिदानन्दवर्याश्चा**सन् । शोधार्थिनौ परमेश्वर-किरणभट्टौ इह सहायकत्वेन अवर्तेताम् ।







उदारचरितानां तु वसुधैव कुटुम्बकम् (The magnanimous, on the other hand, regard the whole as their own family.)


राष्ट्रियसंस्कृतविद्यापीठम्,
संस्कृतनवरात्रम्


राष्ट्रियसंस्कृतविद्यापीठम्,
संस्कृतनवरात्रम् २०१९-२०
समुद्घाटनसमारोहः